# Samvartaproktam Shiva Stotram

# સંવર્તપ્રોક્તં શિવસ્તોત્રમ્

## Document Information

Text title : Samvartaproktam Shiva Stotram

File name : saMvartaproktaMshivastotram.itx

Category : shiva, mahAbhArata, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : mahAbhArata | Ashvaparva | adhyAya 8/12-30||

Latest update : November 15, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

November 15, 2025

*sanskritdocuments.org*

# સંવર્તપ્રોક્તં શિવસ્તોત્રમ્

તસ્મૈ ભગવતે કૃત્વા નમઃ શર્વાય વેધસે ।
રુદ્રાય શિતિકણ્ઠાય સુરૂપાય સુવર્ચસે ॥ ૧૨॥

કપર્દિને કરાલાય હર્યક્ષ્ણે વરદાય ચ ।
ત્ર્યક્ષ્ણે પૂષ્ણો દન્તભિદે વામનાય શિવાય ચ ॥ ૧૩॥

યામ્યાયાવ્યક્તકેશાય સદ્વૃત્તે શઙ્કરાય ચ ।
ક્ષેમ્યાય હરિનેત્રાય સ્થાણવે પુરુષાય ચ ॥ ૧૪॥

હરિકેશાય મુણ્ડાય કૃશાયોત્તારણાય ચ ।
ભાસ્કરાય સુતીર્થાય દેવદેવાય રંહસે ॥ ૧૫॥

ઉષ્ણીષિણે સુવક્ત્રાય સહસ્રાક્ષાય મીઢુષે ।
ગિરિશાય પ્રશાન્તાય યતયે ચીરવાસસે ॥ ૧૬॥

બિલ્વદણ્ડાય સિદ્ધાય સર્વદણ્ડધરાય ચ ।
મૃગવ્યાધાય મહતે ધન્વિનેઽથ ભવાય ચ ॥ ૧૭॥

વરાય સૌમ્યવક્ત્રાય પશુહસ્તાય વર્ષિણે ।
હિરણ્યબાહવે રાજન્નુગ્રાય પતયે દિશામ્ ॥ ૧૮॥

પશૂનાં પતયે ચૈવ ભૂતાનાં પતયે તથા ।
વૃષાય માતૃભક્તાય સેનાન્યે મધ્યમાય ચ ॥ ૧૯॥

સ્રુવહસ્તાય પતયે ધન્વિને ભાર્ગવાય ચ ।
અજાય કૃષ્ણનેત્રાય વિરૂપાક્ષાય ચૈવ હ ॥ ૨૦॥

તીક્ષ્ણદંષ્ટ્રાય તીક્ષ્ણાય વૈશ્વાનરમુખાય ચ ।
મહાદ્યુતયેઽનઙ્ગાય સર્વાઙ્ગાય પ્રજાવતે ॥ ૨૧॥

તથા શુક્રાધિપતયે પૃથવે કૃત્તિવાસસે ।
કપાલમાલિને નિત્યં સુવર્ણમુકુટાય ચ ॥ ૨૨॥

મહાદેવાય કૃષ્ણાય ત્ર્યમ્બકાયાનઘાય ચ ।
ક્રોધનાય નૃશંસાય મૃદવે બાહુશાલિને ॥ ૨૩॥

દણ્ડિને તપ્તતપસે તથૈવ ક્રૂરકર્મણે ।
સહસ્રશિરસે ચૈવ સહસ્રચરણાય ચ ॥ ૨૪॥

નમઃ સ્વધાસ્વરૂપાય બહુરૂપાય દંષ્ટ્રિણે ॥ ૨૪॥

પિનાકિનં મહાદેવં મહાયોગિનમવ્યયમ્ ।
ત્રિશૂલપાણિં વરદં ત્ર્યમ્બકં ભુવનેશ્વરમ્ ॥ ૨૫॥

ત્રિપુરઘ્નં ત્રિનયનં ત્રિલોકેશં મહૌજસમ્ ।
પ્રભવં સર્વભૂતાનાં ધારણં ધરણીધરમ્ ॥ ૨૬॥

ઈશાનં શઙ્કરં સર્વં શિવં વિશ્વેશ્વરં ભવમ્ ।
ઉમાપતિં પશુપતિં વિશ્વરૂપં મહેશ્વરમ્ ॥ ૨૭॥

વિરૂપાક્ષં દશભુજં તિષ્યગોવૃષભધ્વજમ્ ।
ઉગ્રં સ્થાણું શિવં ઘોરં શર્વં ગૌરીશમીશ્વરમ્ ॥ ૨૮॥

શિતિકણ્ઠમજં શુક્રં પૃથું પૃથુહરં હરમ્ ।
વિશ્વરૂપં વિરૂપાક્ષં બહુરૂપમુમાપતિમ્ ॥ ૨૯॥

પ્રણમ્ય શિરસા દેવમનઙ્ગાઙ્ગહરં હરમ્ ।
શરણ્યં શરણં યાહિ મહાદેવં ચતુર્મુખમ્ ॥ ૩૦॥

એવં કૃત્વા નમસ્તસ્મૈ મહાદેવાય રંહસે ।
મહાત્મને ક્ષિતિપતે તત્સુવર્ણમવાપ્સ્યસિ ॥ ૩૧॥

સુવર્ણમાહરિષ્યન્તસ્તત્ર ગચ્છન્તુ તે નરાઃ ॥ ૩૧॥

ઇતિ મહાભારતે આશ્વમેધિકપર્વણિ ૮ અધ્યાયાન્તર્ગતં
સંવર્તપ્રોક્તં શિવસ્તોત્રં

મહાભારત । આશ્વપર્વ । અધ્યાય ૮/૧૨-૩૦॥

mahAbhArata . Ashvaparva . adhyAya 8/12-30..

Proofread by PSA Easwaran

*Samvartaproktam Shiva Stotram*

pdf was typeset on November 15, 2025

Please send corrections to *sanskrit@cheerful.com*